# Papa Prashamana Stotram

# પાપપ્રશમનસ્તોત્રમ્

## Document Information

Text title : Papa Prashamana Stotram

File name : pApaprashamanastotram.itx

Category : vishhnu

Location : doc_vishhnu

Proofread by : PSA Easwaran

Description/comments : Vamanamahapurana

Acknowledge-Permission: http://kshetrayaatra.blogspot.com

Latest update : July 27, 2018

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

September 16, 2023

*sanskritdocuments.org*

# Papa Prashamana Stotram

## પાપપ્રશમનસ્તોત્રમ્

પુલસ્ત્ય ઉવાચ -
નમેસ્તેઽસ્તુ જગન્નાથ દેવદેવ નમોઽસ્તુ તે ।
વાસુદેવ નમસ્તેઽસ્તુ બહુરૂપ નમોઽસ્તુ તે ॥ ૧॥

એકશ‌ૃઙ્ગ નમસ્તુભ્યં નમસ્તુભ્યં વૃષાકપે ।
શ્રીનિવાસ નમસ્તેઽસ્તુ નમસ્તે ભૂતભાવન ॥ ૨॥

વિષ્વક્સેન નમસ્તુભ્યં નારાયણ નમોઽસ્તુ તે ।
ધ્રુવધ્વજ નમસ્તેઽસ્તુ સત્યધ્વજ નમોઽસ્તુ તે ॥ ૩॥

યજ્ઞધ્વજ નમસ્તુભ્યં ધર્મધ્વજ નમોઽસ્તુ તે ।
તાલધ્વજ નમસ્તેઽસ્તુ નમસ્તે ગરુડધ્વજ ॥ ૪॥

વરેણ્ય વિષ્ણો વૈકુણ્ઠ નમસ્તે પુરુષોત્તમ ।
નમો જયન્ત વિજય જયાનન્તાપરાજિત ॥ ૫॥

કૃતાવર્ત મહાવર્ત મહાદેવ નમોઽસ્તુ તે ।
અનાદ્યાદ્યન્તમધ્યાન્ત નમસ્તે પદ્મજાપ્રિય ॥ ૬॥

પુરઞ્જય નમસ્તુભ્યં શત્રુઞ્જય નમોઽસ્તુ તે ।
શુભઞ્જય નમસ્તેઽસ્તુ નમસ્તેઽસ્તુ ધનઞ્જય ॥ ૭॥

સૃષ્ટિગર્ભ નમસ્તુભ્યં શુચિશ્રવઃ પૃથુશ્રવઃ ।
નમો હિરણ્યગર્ભાય પદ્મગર્ભાય તે નમઃ ॥ ૮॥

નમઃ કમલનેત્રાય કાલનેત્રાય તે નમઃ ।
કાલનાભ નમસ્તુભ્યં મહાનાભ નમો નમઃ ॥ ૯॥

વૃષ્ટિમૂલ મહામૂલ મૂલાવાસ નમોઽસ્તુ તે ।
ધર્માવાસ જલાવાસ શ્રીનિવાસ નમોઽસ્તુ તે ॥ ૧૦॥

ધર્માધ્યક્ષ પ્રજાધ્યક્ષ લોકાધ્યક્ષ નમો નમઃ ।

સેનાધ્યક્ષ નમસ્તુભ્યં કાલાધ્યક્ષ નમોઽસ્તુ તે ॥ ૧૧॥

ગદાધર શ્રુતિધર ચક્રધારિન્ શ્રિયોધર ।
વનમાલાધર હરે નમસ્તે ધરણીધર ॥ ૧૨॥

આર્ચિષેણ મહાસેન નમસ્તેઽસ્તુ પુરુષ્ટુત ।
બહુકલ્પ મહાકલ્પ નમસ્તે કલ્પનામુખ ॥ ૧૩॥

સર્વાત્મન્ સર્વગ વિભો વિરિઞ્ચે શ્વેત કેશવ ।
નીલ રક્ત મહાનીલ અનિરુદ્ધ નમોઽસ્તુ તે ॥ ૧૪॥

દ્વાદશાત્મક કાલાત્મન્ સામાત્મન્ પરમાત્મક ।
વ્યોમકાત્મક સુબ્રહ્મન્ ભૂતાત્મક નમોઽસ્તુ તે ॥ ૧૫॥

હરિકેશ મહાકેશ ગુડાકેશ નમોઽસ્તુ તે ।
મુઞ્જકેશ હૃષીકેશ સર્વનાથ નમોઽસ્તુ તે ॥ ૧૬॥

સૂક્ષ્મ સ્થૂલ મહાસ્થૂલ મહાસૂક્ષ્મ શુભઙ્કર ।
શ્વેતપીતામ્બરધર નીલવાસ નમોઽસ્તુ તે ॥ ૧૭॥

કુશેશય નમસ્તેઽસ્તુ પદ્મેશય જલેશય ।
ગોવિન્દપ્રીતિકર્તા ચ હંસ પીતામ્બરપ્રિય ॥ ૧૮॥

અધોક્ષજ નમસ્તુભ્યં સીરધ્વજ જનાર્દન ।
વામનાય નમસ્તેઽસ્તુ નમસ્તે મધુસૂદન ॥ ૧૯॥

સહસ્રશીર્ષાય નમો બ્રહ્મશીર્ષાય તે નમઃ ।
નમઃ સહસ્રનેત્રાય સોમસૂર્યાનલેક્ષણ ॥ ૨૦॥

નમશ્ચાઽથર્વશિરસે મહાશીર્ષાય તે નમઃ ।
નમસ્તે ધર્મનેત્રાય મહાનેત્રાય તે નમઃ ॥ ૨૧॥

નમઃ સહસ્રપાદાય સહસ્રભુજમન્યવે ।
નમો યજ્ઞવરાહાય મહારૂપાય તે નમઃ ॥ ૨૨॥

નમસ્તે વિશ્વદેવાય વિશ્વાત્મન્ વિશ્વસમ્ભવ ।
વિશ્વરૂપ નમસ્તેઽસ્તુ ત્વત્તો વિશ્વમભૂદિદમ્ ॥ ૨૩॥

ન્યગ્રોધસ્ત્વં મહાશાખસ્ત્વં મૂલકુસુમાર્ચિતઃ ।
સ્કન્ધપત્રાઙ્કુરલતાપલ્લવાય નમોઽસ્તુ તે ॥ ૨૪॥

મૂલં તે બ્રાહ્મણા બ્રહ્મન્ સ્કન્ધસ્તે ક્ષત્રિયાઃ પ્રભો ।
વૈશ્યાઃ શાખા દલં શૂદ્રા વનસ્પતે નમોઽસ્તુ તે ॥ ૨૫॥

બ્રાહ્મણાઃ સાઽગ્નયો વક્ત્રાઃ દોર્દણ્ડાઃ સાયુધા નૃપાઃ ।
પાર્શ્વાદ્વિશશ્ચોરુયુગાજ્જાતાઃ શૂદ્રાશ્ચ પાદતઃ ॥ ૨૬॥

નેત્રાદ્ભાનુરભૂત્તુભ્યં પદ્ભ્યાં ભૂઃ શ્રોત્રયોર્દિશઃ ।
નાભ્યા હ્યભૂદન્તરિક્ષં શશાઙ્કો મનસસ્તવ ॥ ૨૭॥

પ્રાણાદ્વાયુઃ સમભવત્કામાદ્બ્રહ્મા પિતામહઃ ।
ક્રોધાત્ત્રિનયનો રુદ્રઃ શીર્ષ્ણોર્દ્યૌઃ સમવર્તત ॥ ૨૮॥

ઇન્દ્રાગ્ની વદનાત્તુભ્યં પશવો મલસમ્ભવાઃ ।
ઓષધ્યો રોમસમ્ભૂતા વિરાજસ્ત્વં નમોઽસ્તુ તે ॥ ૨૯॥

પુષ્પહાસ નમસ્તેઽસ્તુ મહાહાસ નમોઽસ્તુ તે ।
ઓઙ્કારસ્ત્વં વષટ્કારો વૌષટ્ત્વં ચ સ્વધા સુધા ॥ ૩૦॥

સ્વાહાકાર નમસ્તુભ્યં હન્તકાર નમોઽસ્તુ તે ।
સર્વાકાર નિરાકાર વેદાકાર નમોઽસ્તુ તે ॥ ૩૧॥

ત્વં હિ વેદમયો દેવઃ સર્વદેવમયસ્તથા ।
સર્વતીર્થમયશ્ચૈવ સર્વયજ્ઞમયસ્તથા ॥ ૩૨॥

નમસ્તે યજ્ઞપુરુષ યજ્ઞભાગભુજે નમઃ ।
નમઃ સહસ્રધારાય શતધારાય તે નમઃ ॥ ૩૩॥

ભૂર્ભુવઃ સ્વઃ સ્વરૂપાય ગોદાયામૃતદાયિને ।
સુવર્ણબ્રહ્મદાત્રે ચ સર્વદાત્રે ચ તે નમઃ ॥ ૩૪॥

બ્રહ્મેશાય નમસ્તુભ્યં બ્રહ્માદે બ્રહ્મરૂપધૃક્ ।
પરબ્રહ્મ નમસ્તેઽસ્તુ શબ્દબ્રહ્મ નમોઽસ્તુ તે ॥ ૩૫॥

વિદ્યાસ્ત્વં વેદ્યરૂપસ્ત્વં વેદનીયસ્ત્વમેવ ચ ।
બુદ્ધિસ્ત્વમપિ બોધ્યશ્ચ બોધસ્ત્વં ચ નમોઽસ્તુ તે ॥ ૩૬॥

હોતા હોમશ્ચ હવ્યં ચ હૂયમાનશ્ચ હવ્યવાટ્ ।
પાતા પોતા ચ પૂતશ્ચ પાવનીયશ્ચ ૐ નમઃ ॥ ૩૭॥

હન્તા ચ હન્યમાનશ્ચ હ્રિયમાણસ્ત્વમેવ ચ ।
હર્ત્તા નેતા ચ નીતિશ્ચ પૂજ્યોઽગ્ર્યો વિશ્વધાર્યસિ ॥ ૩૮॥

સ્રુક્સ્રુવૌ પરધામાસિ કપાલોલૂખલોઽરણિઃ ।
યજ્ઞપાત્રારણેયસ્ત્વં એકધા બહુધા ત્રિધા ॥ ૩૯॥

યજ્ઞસ્ત્વં યજમાનસ્ત્વં ઈડ્યસ્ત્વમસિ યાજકઃ ।
જ્ઞાતા જ્ઞેયસ્તથા જ્ઞાનં ધ્યેયો ધ્યાતાઽસિ ચેશ્વરઃ ॥ ૪૦॥

ધ્યાનયોગશ્ચ યોગી ચ ગતિર્મોક્ષો ધૃતિઃ સુખમ્ ।
યોગાઙ્ગાનિ ત્વમીશાનઃ સર્વગસ્ત્વં નમોઽસ્તુ તે ॥ ૪૧॥

બ્રહ્મા હોતા તથોદ્ગાતા સામ યૂપોઽથ દક્ષિણા ।
દીક્ષા ત્વં ત્વં પુરોડાશસ્ત્વં પશુઃ પશુવાહ્યસિ ॥ ૪૨॥

ગુહ્યો ધાતા ચ પરમઃ શિવો નારાયણસ્તથા ।
મહાજનો નિરયનઃ સહસ્રાર્કેન્દુરૂપવાન્ ॥ ૪૩॥

દ્વાદશારોઽથ ષણ્ણાભિસ્ત્રિવ્યૂહો દ્વિયુગસ્તથા ।
કાલચક્રો ભવાનીશો નમસ્તે પુરુષોત્તમ ॥ ૪૪॥

પરાક્રમો વિક્રમસ્ત્વં હયગ્રીવો હરીશ્વરઃ ।
નરેશ્વરોઽથ બ્રહ્મેશઃ સૂર્યેશસ્ત્વં નમોઽસ્તુ તે ॥ ૪૫॥

અશ્વવક્ત્રો મહામેધાઃ શમ્ભુઃ શક્રઃ પ્રભઞ્જનઃ ।
મિત્રાવરુણમૂર્તિસ્ત્વમમૂર્તિરનઘઃ પરઃ ॥ ૪૬॥

પ્રાગ્વંશકાયો ભૂતાદિર્મહાભૂતોઽચ્યુતો દ્વિજઃ ।
ત્વમૂર્ધ્વકર્ત્તા ઊર્ધ્વશ્ચ ઊર્ધ્વરેતા નમોઽસ્તુ તે ॥ ૪૭॥

મહાપાતકહા ત્વં ચ ઉપપાતકહા તથા ।
અનીશઃ સર્વપાપેભ્યસ્ત્વામહં શરણં ગતઃ ॥ ૪૮॥

ફલશ્રુતિઃ ।
ઇત્યેતત્પરમં સ્તોત્રં સર્વપાપપ્રમોચનમ્ ।
મહેશ્વરેણ કથિતં વારાણસ્યાં પુરા મુને ॥ ૪૯॥

કેશવસ્યાગ્રતો ગત્વા સ્નાત્વા તીર્થે સિતોદકે ।
ઉપશાન્તસ્તથા જાતો રુદ્રઃ પાપવશાત્તતઃ ॥ ૫૦॥

એતત્પવિત્રં ત્રિપુરઘ્નભાષિતં પઠન્નરો વિષ્ણુપરો મહર્ષે ।
વિમુક્તપાપો હ્યુપશાન્તમૂર્તિઃ સમ્પૂજ્યતે દેવવરૈઃ પ્રસિદ્ધૈઃ ॥ ૫૧॥

॥ ઇતિ શ્રીવામનમહાપૂરાણે પાપપ્રશમનસ્તોત્રં સમ્પૂર્ણમ્ ॥

Proofread by PSA Easwaran

*Papa Prashamana Stotram*

pdf was typeset on September 16, 2023

Please send corrections to *sanskrit@cheerful.com*